# संस्कृत-वार्ता:

दिनाङ्क :- 22.09.2024 सायम् - 06:20

**मुख्यवार्ता:**

- प्रधानमन्त्रिणा मोदिना प्रतिपादितं यत् क्वाड् समूहीकरणं स्वतन्त्रस्य, मुक्तस्य, समावेशी, समृद्धस्य च भारत-प्रशांतस्य कृते प्रतिबद्धम् अस्ति। भारतं पञ्चविंशत्यधिक द्वि सहस्रतमे वर्षे क्वाड्-शिखरसम्मेलनस्य आतिथ्यं विधास्यति।
- अद्य रात्रौ प्रधानमन्त्री मोदी न्यूयॉर्कनगरे भारतीयसमुदायस्य समागमं सम्बोधयिष्यति।
- भारतेन अमेरिकादेशस्य डेलावेर्-नगरे स्वच्छ-अर्थव्यवस्था, निष्पक्ष-अर्थव्यवस्थामालक्ष्य हिन्द-प्रशांत-आर्थिक-रूपरेखा-आईपीईएफ इत्यत्र सन्धिपत्राणि हस्ताक्षरितानि।
- श्रीलङ्कादेशे राष्ट्रपतिनिर्वाचनानां मतगणना द्वितीयचरणे संप्राप्ता । यतः प्रथमचरणस्य अपेक्षितं पञ्चाशत् प्रतिशतमतानि केनापि प्रत्याशिनेन न प्राप्तानि ।
- भारतेन अद्य चेन्नई-नगरे प्रथम-क्रिकेट-निकष-स्पर्धायां बांग्लादेशदलम् अशीत्युत्तर-द्विशतं धावनाङ्कैः पराजितम्।

**क्वाड सम्मेलन**

प्रधानमन्त्रिणा नरेन्द्रमोदिना पुष्टि कृता यत् क्वाड् समूहः दीर्घकालिक सहभागी भवितुं सज्जः अस्ति, यः परस्परवृद्ध्यै स्थिरतायै च भारत-प्रशांतराष्ट्रैः सह सहकार्यं कर्तुं सज्जः अस्ति। अद्य प्रधानमन्त्रिणः मोदिनः अमेरिकादेशस्य त्रिदिवसीययात्रायाः प्रमुखाणां विषयाणां उल्लेखम् कुर्वता विदेशसचिवः विक्रममिस्री वार्ताहरान् ज्ञापितवान्। श्रीमोदी क्वाड्-नेतृणां-शिखरसम्मेलने भागं गृहीत्वा गतरात्रौ डेलावेर्-नगरे क्वाड्-सदस्य-देशानां नेतृभिः सह द्विपक्षीय-उपवेशनं च कृतवान्। अवधेयमस्ति यत् क्वाड् इत्यस्मिन् चत्वारः देशाः - भारतं, आस्ट्रेलिया, जापानं, अमेरिका च सम्मिलिताः सन्ति। विदेशसचिवेन एतदपि उक्तं यत् भारतं पञ्चविंशत्यधिक द्वि सहस्रतमे वर्षे क्वाड्-शिखरसम्मेलनस्य आतिथ्यं विधास्यति। श्रीमिस्री अवादीत् यत् क्वाड्-नेतृणां-शिखरसम्मेलनं द्विपक्षीय उपवेशनैः च प्रधानमन्त्रिणे मोदिने वैश्विकवृद्धेः, शान्तेः, सुरक्षायाः च कृते भारतस्य दृष्टिः अभिव्यक्तुं मञ्चः प्रदत्तः। श्रीमिस्री अवोचत् यत्, प्रधानमन्त्री मोदी अमेरिकीराष्ट्रपतिं जो बाइडेनस्य कृते आभारं प्रकटितवान् यत् सः क्वाड् लीडर्स् शिखरसम्मेलनस्य आतिथ्यं कृतवान् तथा च समूहीकरणे सुदृढीकरणे च तस्य नेतृत्वं कृतवान्, वैश्विकसहकार्यं पोषणार्थं गठबन्धनस्य महत्त्वं प्रकाशितवान्। पूर्वं शिखरसम्मेलने

प्रवदन् प्रधानमन्त्रिणा मोदिना प्रतिपादितं यत् क्वाड् समूहीकरणं स्वतन्त्रस्य, मुक्तस्य, समावेशी, समृद्धस्य च भारत-प्रशांतस्य कृते प्रतिबद्धम् अस्ति। प्रधानमन्त्रिणा उक्तं यत् क्वाड्-देशैः मिलित्वा अनेकेषु क्षेत्रेषु अनेकाः उपक्रमाः विहिताः। क्वाड् शिखरसम्मेलनं विहाय प्रधानमन्त्री मोदी गतरात्रौ डेलावेर्-नगरे बाइडेन्-महोदयस्य निवासस्थाने अमेरिकीराष्ट्रपतिना सह द्विपक्षीयवार्तां अकरोत्। उपवेशनावधौ द्वौ नेतारौ भारत-अमेरिका-व्यापकवैश्विकरणनीतिकसंधिं अधिकं सुदृढं कर्तुं नूतनानां मार्गाणाम् अभिज्ञानं अकुरुताम्। सामाजिक अंतर्जाल पटल माध्यमेन प्रधानमन्त्री मोदी अवादीत् यत्, वार्ता अत्यन्तं लाभप्रदा आसीत्। राष्ट्रपतिः बाइडेन सामाजिकमाध्यमेषु एकस्मिन् संदेशे अवादीत् यत्, भारतेन सह अमेरिकायाः संधिः अद्यत्वे अधिकं सशक्तं, निकटतरं, अधिकं गतिशीलं च वरीवर्ति। वार्ताहरैः सह वार्तां कुर्वन् विदेशसचिवः विक्रममिस्री मोदीमहोदयस्य बाइडेनमहोदयेन सह चर्चायाः विषये अन्यविवरणानि अपि ज्ञापितवान् यत्र सप्तनवतिः अधिक द्विशतचोरितानां भारतीयप्राचीनवस्तूनाम् प्रत्यागमनस्य निर्णयः अपि अस्ति। प्रधानमन्त्री मोदी सामाजिक पटलस्य संदेशे, एतासां कलाकृतीनां भारतं प्रति प्रत्यागमनं सुनिश्चेतुं अमेरिकीयप्रशासनाय राष्ट्रपति जो बाइडेन् महोदयाय च धन्यवादम् अयच्छत् । द्विपक्षीयसमागमस्य पार्श्वे केचन प्राचीनवस्तूनि प्रतीकात्मकरूपेण हस्तान्तरणरूपेण द्वयोः नेत्रोः कृते प्रदर्शितानि आसन् । मोदीमहोदयेन जापान-ऑस्ट्रेलिया-देशयोः सह अपि वार्ता अकारि। जापानस्य प्रधानमन्त्रिणा फुमियो किशिदा इत्यनेन सह मोदीमहोदयः भारत-जापानसम्बन्धस्य समीक्षां विहितवान्।द्विपक्षीयसम्बन्धविस्तारस्य उपायानां विषये च चर्चां अकरोत्। श्री मोदी, आस्ट्रेलिया-प्रधानमन्त्री एन्थनी अल्बानीस् च स्वसमागमस्य समये परस्परं लाभाय तथा च भारत-प्रशांतक्षेत्रस्य शान्ति-स्थिरता-समृद्ध्यर्थं व्यापक-रणनीतिक-संधिं अधिकं गभीरं कर्तुं स्वप्रतिबद्धतां पुनः पुष्टिं कृतवन्तौ।

अद्य रात्रौ प्रधानमन्त्री मोदी न्यूयॉर्कनगरे भारतीयसमुदायस्य समागमं सम्बोधयिष्यति। सः अमेरिका-आधारितस्य प्रमुखसमवायानां शीर्षकार्यकारीभिः सह अपि मिलित्वा कृत्रिमबुद्धिमता, क्वाण्टम् कम्प्यूटिङ्ग्, इत्यादिषु उदयमानप्रौद्योगिकीषु अधिकं सहकार्यं अन्वेष्टुं निश्चितः अस्ति।

<u>आईपीईएफ</u>

भारतेन अमेरिकादेशस्य डेलावेर्-नगरे स्वच्छ-अर्थव्यवस्था, निष्पक्ष-अर्थव्यवस्थामालक्ष्य हिन्द-प्रशांत-आर्थिक-रूपरेखा-आईपीईएफ-इत्यत्र सन्धिपत्राणि हस्ताक्षरितानि। एतेषां सन्धिपत्राणां आदानप्रदानं भारत-प्रशांत-आर्थिक-रूपरेखायान्तर्गतं प्रधानमन्त्रिणः नरेन्द्रमोदिनः सान्निध्ये सञ्जातम्। स्वच्छ अर्थव्यवस्थासम्बद्ध पत्राणां उद्देश्यं तकनीकीसहकार्यं, कार्यबलविकासः, क्षमतानिर्माणं, अनुसन्धानं च इत्यत्र सहकार्यं प्रवर्तयितुं वर्तते। सन्धिपत्रेषु सूक्ष्म-लघु-मध्यम-उद्यमानां संवर्धने विशेषं बलं दत्तम् अस्ति ।

## विश्व गण्डक दिवस:

विश्व गण्डक दिवस: अद्य आमान्यते। दिवसोऽयं गण्डकसंरक्षणस्य महत्त्वस्य वैश्विकस्मरणत्वेन वर्तते। जलवायुपरिवर्तनकारणात् प्राकृतिक-पारिस्थितिकीतन्त्रे विकासस्य कारणात् च गण्डकानां संख्या न्यूना अस्ति। एतेषां भव्यजीवानां भविष्ये अस्तित्वं सुनिश्चेतुं सामूहिकप्रयत्ना: करणीया: इति दिवसोऽयं प्रकाशयति। अवसरेऽस्मिन् स्वसंदेशे प्रधानमंत्री श्रीमोदी गण्डकानां रक्षणार्थं भारतस्य प्रतिबद्धतां अवोचत्। श्रीमोदी एकस्मिन् सामाजिक-अन्तर्जाल पटल माध्यमेन अब्रवीत् यत् भारते एकश्रृङ्गगण्डकानां संख्या अधिका इति गौरवस्य विषय: वर्तते।

## श्रीलंका-राष्ट्रपति निर्वाचन मतगणना

श्रीलङ्कादेशे राष्ट्रपतिनिर्वाचनानां मतगणना द्वितीयचरणे संप्राप्ता । यतः प्रथमचरणस्य अपेक्षितं पञ्चाशत प्रतिशतमतानि केनापि प्रत्याशिनेन न प्राप्तानि । निर्वाचनायोगेन उक्तं यत् शीर्षद्वयं अभ्यर्थिनं विहाय अन्ये प्रत्याशिनः किञ्चिदपि मतानि न प्राप्तवन्तः। अन्येषां प्रत्याशिनां द्वितीय-तृतीय-चरणयो: प्राप्तानि मतानि एतयोः शीर्षप्रत्याशिनो: मध्ये पुनः वितरितानि भविष्यन्ति। यः प्रत्याशी सर्वाधिकं मतं प्राप्तं करिष्यति। सः एव विजेता इति घोषयिष्यते।

## क्रिकेट

भारतेन अद्य चेन्नई-नगरे प्रथम-क्रिकेट-निकष-स्पर्धायां बांग्लादेशदलम् अशीत्युत्तर-द्विशतं धावनाङ्कैः पराजितम्। शृखलायां भारतम् एकं शून्यमिति अङ्कान्तरालेन अग्रत्वं संधत्ते। द्वितीयपाल्यं पञ्चदशोत्तर-पञ्चशतं धावनाङ्कानां विशाल-लक्ष्यम् अनुसरता बाङ्ग्लादेश-दलेन चतुस्त्रिंशदुत्तर-द्विशतं धावनाङ्काः एव अधिगताः। रविचंद्रन अश्विनेन षड् क्रीडकाः स्तोभात् बहिकृताः। येन भारतेन व्यापकविजयः अधिगतः।

॥ इति वार्ताः॥